क्र० - ९५
परि० सं० ४२७५
मूर्ति रहस्य तन्त्र
पत्र - १० - पू०

मूर्ति रहस्य

ऐ सुरपते रपयो वे रस्तनमंकामसो दमं कवचं ॥ ॥र्यमाप्रसिदं
मस्तूगालिकास्तोत्रं ॥ ॥७॥ संवत १८ ६ लपक्ष मासि लवलुर्वपां
तगोलिसिवतं ॥ ॥ ॥

२२८
मड्डा/ला

[illegible]

॥श्रीरामरचना माहाल्मैम्रत्री हत हस्याक्षरमतं
पंनै २०

4274

श्री भट्ट गोविंद

श्रीगणेशाय नमः॥ ॐ नमश्चंडिकायै॥ राजोवाच॥ ॥ भगवन्नवतारा मे
चंडिकायास्त्वयोदिताः। एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि॥१॥ आ
राध्यं यन्मया देव्याः स्वरूपं येन वै द्विज। विधिना ब्रूहि सकलं यथावत्प्रण
तस्य मे॥२॥ ऋषिरुवाच॥ इदं रहस्यं परममनाख्येयं प्रचक्षते। भक्तोसी
ति न मे किंचित्तवावाच्यं नराधिप॥३॥ सर्वस्याद्या महालक्ष्मी त्रिगुणा
सकलेश्वरी। लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं जगत्स्थिता॥४॥ मातुलिं
गं गदां खेटं पानपात्रं च बिभ्रती। नागं लिंगं च योनिं च बिभ्रती नृपमूर्धनि पर
॥५॥ तप्तकांचनवर्णाभा तप्तकांचनभूषणा। शून्यं तदखिलं लोकं विलो

एवं ते कथितं राजन् देवीमाहात्म्यमुत्तमं। एवंप्रभावा सा देवी ययेदं धार्य
ते जगत्॥२॥ विद्या तथैव क्रियते भगवद्विष्णुमायया। तया त्वमेष वैश्य
श्च तथैवान्ये विवेकिनः॥३॥ मोह्यन्ते मोहिताश्चैव मोहमेष्यंति चापरे। ता
मुपैहि महाराज शरणं परमेश्वरीं॥४॥ आराधिता सैव नृणां भोगस्वर्गा
पवर्गदा॥ श्रीमार्कंडेय उवाच॥ इति तस्य वचः श्रुत्वा सुरथः स नराधि
पः। प्रणिपत्य महाभागं तमृषिं शंसितव्रतं। निर्विण्णोतिममत्वेन राज्याप
हरणेन च॥५॥ जगाम सद्यस्तपसे स च वैश्यो महामुने। संदर्शनार्थमंबा पर
या नदीपुलिनमास्थितः॥६॥ स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्। तौ

।विश्वं सैव विश्वं प्रसूयते।सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति॥
२३॥ व्याप्तं तयैतत्सकलं ब्रह्मांडं मनुजेश्वर।महाकाल्या महाकाले म
हामारीस्वरूपया॥२४॥ सैव काले महामारी सैव सृष्टिर्भवत्यजा॥स्थि
तिं करोति भूतानां सैव काले सनातनी॥२६॥ भवकाले नृणां सैव लक्ष्मी
र्वृद्धिप्रदा गृहे।सैवाभावे तथालक्ष्मीर्विनाशायोपजायते॥२७॥ स्तु
ता संपूजिता पुष्पैर्धूपगंधादिभिस्तथा।ददाति वित्तं पुत्रांश्च म
तिं धर्मे गतिं शुभां॥२८॥ ॥इति श्रीमार्कंडेयपुराणे सावर्णि[illegible]
न्वंतरे देवीश्रीजगतीमाहात्म्ये [illegible]कथनं नाम॥ ॥ऋषिरुवाच॥

तां॥१९॥ महाकाली भारती च मिथुने सृजतः सह।एतद्घोरविरूपाणि
नामानि च वदामि ते॥२०॥ नीलकंठं रक्तबाहुं श्वेतांगं चंद्रशेखरं।जन
यामास पुरुषं महाकाली सितां स्त्रियं॥२१॥ स रुद्रः शंकरः स्थाणुः कप
र्दी च त्रिलोचनः।त्रयी विद्या कामधेनुः सा स्त्री भाषाक्षरा स्वरा॥२२॥ सर
श्री स्वती स्त्रियं गौरी कृष्णं च पुरुषं नृप।जनयामास नामानि तयोरपि
वदामि ते॥२३॥ विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः।उमा गौ
री सती चंडी सुंदरी सुभगा शिवा॥२४॥ एवं युवतयः सद्यः पुरुषत्वं प्रप
दिरे।चक्षुष्मंतो न पश्यंति नेतरे तद्विदो जनाः॥२५॥ ब्रह्मणे प्रददौ पत्नीं

महालक्ष्मीर्नृपत्रयीं।रुद्राय गौरीं वरदां वासुदेवाय च श्रियं॥२६॥स्वरया स
ह संभूय विरिंचोंडमजीजनत्।बिभेद भगवान् रुद्रस्तद्गौर्या सह वीर्यवान्
॥२७॥अंडमध्ये प्रधानादि कार्यजातमभून्नृप।महाभूतात्मकं सर्वं जग
त्स्थावरजंगमं॥२८॥पुपोष पालयामास तल्लक्ष्म्या सह केशवः।महाल
क्ष्मीरेव महाराजन् सर्वलोकेश्वरेश्वरी॥२९॥निराकारा च साकारा सैव
नानाभिधानभृत्।नामांतरैर्निरूप्यैषा नाम्ना नान्येन केनचित्॥३०॥
इतिश्री मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये प्राधानिकं ५५
नाम रहस्यं॥ ॥ऋषिरुवाच॥त्रिगुणा तामसी देवी सात्विका या त्रिधो

नज्ञा दिता।सा सर्वा चंडिका दुर्गा भद्रा भगवतीर्यते॥१॥योगनिद्रा हरेरुक्ता महा
काली तमोगुणा।मधुकैटभनाशार्थं यां तुष्टावांबुजासनः॥२॥दशवक्त्रा
दशभुजा दशपादांजनप्रभा।विशालया राजमाना त्रिंशल्लोचनमालया
॥३॥स्फुरद्दशनदंष्ट्रा सा भीमरूपापि भूमिप।रूपसौभाग्यकांतीनां सा प्र
तिष्ठा महाश्रियां॥४॥खड्गबाणगदाशूलचक्रशंखभुशुंडिभृत्।परिघं
कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ॥५॥एषा सा वैष्णवी माया कालरात्रिर्दु
रत्यया।आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरं॥६॥सर्वदेवशरीरेभ्यो
याविर्भूतामितप्रभा।त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी॥७॥

५६ श्वेताननानीलभुजा सुश्वेतस्तनमंडला। रक्तमध्या रक्तपादा नीलजंघोरुरु
न्मदा ॥८॥ सुचित्रजघना चित्रमाल्यांबरविभूषणा। चित्रानुलेपना कांति
रूपसौभाग्यशालिनी ॥९॥ अष्टादशभुजा पूज्या सा सहस्रभुजा सती। आयु
धान्यत्र वक्ष्यंते दक्षिणाधःकरक्रमात् ॥१०॥ अक्षमाला च कमलं बाणो
ऽसिः कुलिशं गदा। चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः ॥११॥ शक्ति
र्दंडश्चर्म चापं पानपात्रं कमंडलुः। अलंकृतभुजामेभिरायुधैः कमलास
नां ॥१२॥ सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप। पूजयेत्सर्वलोकानां ५६
स देवानां प्रभुर्भवेत् ॥१३॥ गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रया। सा।

नघनस्तनी। मुष्टिं शिलीमुखैः पूर्णं कमलं कमलालयं ॥१३॥ पुष्पप
ल्लवमूलादिफलाढ्यं शाकसंचयं। काम्यानंतरसैर्युक्तं क्षुत्तृण्मृत्यु
भयापहं ॥१४॥ कार्मुकं च स्फुरत्कांति बिभ्रती परमेश्वरी। शाकंभरी
शताक्षी सा सैव दुर्गा प्रकीर्तिता ॥१५॥ उमा गौरी सती चंडी कालिका
सा च पार्वती। शाकंभरीं स्तुवन् ध्यायन् जपन् संपूजयन्नमन् ॥१६॥
अक्षय्यमश्नुते शीघ्रमन्नपानामृतात्मकं। भीमापि नीलवर्णा सा दं
ष्ट्रादशनभासुरा ॥१६॥ विशाललोचना नारी वृत्तपीनपयोधरा। चं
द्रहासं च डमरुं शिरः पात्रं च बिभ्रती ॥१७॥ एकवीरा कालरात्रिः सैवोक्ता

८

कामदा स्तुता। तेजोमंडलदुर्धर्षा भ्रामरी चित्रकांतिभृत् ॥१८॥ चित्रभ्र
मरपाणिः सा महामारीति गीयते। इत्येते मूर्तयो देव्या याः ख्याता वसुधा
धिप ॥१९॥ जगन्मातुश्चंडिकायाः कीर्तिताः कामधेनवः। इदं रहस्यं
परमं न वाच्यं कस्यचित् त्वया ॥२०॥ व्याख्यानं दिव्यमूर्तीनामधीष्वा
लहितः स्वयं ॥ मेधां श्रज्ञानं यात् लक्ष्मीमेन कुर्लंत पछति ॥२१॥ सप्त
जन्मनि पापानि ब्रह्महत्यादिकानि च। पठनात् ध्यानमात्रेण मुच्यते ६०
सर्वकिल्बिषैः ॥२२॥ पूजाविधिविधानेन जगन्माता च तुष्यति ॥२३॥

मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये देवीकृतिकं नाम रहस्यं ॥ ॥
ऋषिरुवाच ॥ नंदा भगवती नाम या भविष्यति नंदजा। सा स्तुता सम्यक् भक्त्या व पूजिता:
शीकुर्याज्जगत्त्रयं ॥१॥ कनकोत्तमकांतिः सा सुकांतिकनकांबरा। देवी
कनकवर्णाभा कनकोत्तमभूषणा ॥२॥ कमलांकुशपाशाब्जैरलंकृतचतुर्भु
जा। इंदिरा कमला लक्ष्मीः सा श्रीरुक्मांबुजासना ॥३॥३॥ या रक्तदंतिका
नाम देवी प्रोक्ता मयानघ। तस्याः स्वरूपं वक्ष्यामि शृणु पापभयापहं ॥
रक्तांबरा रक्तवर्णा रक्तसर्वांगभूषणा। रक्तायुधा रक्तनेत्रा रक्तकेशाति भी
षणा ॥४॥ रक्ततीक्ष्णनखा रक्तदशना रक्तदंतिका। पतिं नारीवानुरक्ता दे

लक्षं नजेकृतं ॥६॥ वसुधेवसितन्नाला सासुमेरुयुगलस्तनी। दीर्घौलंबा
वतिस्पृष्टौ नाभिनालीवमनोहरौ ॥७॥ कर्कशावतिकांतौ तुसर्वानंदपयो
निधी। भक्तान्संपादयेद्देवी सर्वकामदुघोस्तनौ ॥८॥ खड्गपात्रं मुशालं
लांगलंचबिभर्ति मा। आख्याता रक्तचामुंडादेवीयोगेश्वरीतिच ॥९॥ अ
नयाव्याप्तमखिलंजगत्स्थावरजंगमं। इमांयःपूजयेद्भक्त्यासव्याप्नोति
चराचरं ॥१०॥ अधीतेयइमंनित्यंरक्तदंत्यावपुःस्तवं। तंसापरिचरेद्देवी
पतिंप्रियमिवांगना ॥११॥ शाकंभरीनीलवर्णानीलोत्पलविलोचना।
गंभीरनाभिस्त्रिवलीविभूषिततनूदरी ॥१२॥ सुकर्कशसमोत्तुंगवृत्तपी

नस्तनीं। स्वर्णादिविविधलंकारैर्गंधपुष्पाफलैर्युता ॥१३॥ धूपदीपैश्चनै
वेद्यैर्नानाभक्ष्यसमन्वितैः। रुधिराक्तेनबलिनामांसेनसुरयानृप ॥१४॥
प्रणामाचमनीयेनचंदनेनसुगंधिना। सकर्पूरैश्चतांबूलैर्भक्तिभावस
मन्वितैः ॥१५॥ वाममग्रेऽग्रतोदेव्याश्छिन्नशीर्षंमहासुरं। महिषंपूज
येद्येनप्राप्तंसायुज्यमीशया ॥१६॥ दक्षिणेपुरतःसिंहंसमग्रंधर्ममीश्व
रं। वाहनंपूजयेद्देव्याधृतंयेनचराचरं ॥१७॥ ततःकृतांजलिर्भूत्वास्तुवी
तचरितैरिमैः। एकेनवामध्यमेननैकेनेतरयोरिह ॥१८॥ चरितार्धंतुन
जपेज्जपंछिद्रमवाप्नुयात्। स्तोत्रमंत्रैःस्तुवीतेमांयदिवाजगदंबिकां ॥१९

प्रदक्षिणान्नमस्कारान्कृत्वा मूर्द्धि कृतांजलिः। क्षमापयेज्जगद्धात्रीं मुहुर्मुहु-
रतंद्रितः ॥३४॥ प्रतिश्लोकेन जुहुयात्पायसं तिलसर्पिषा। जुहुयात्स्तोत्रमं-
त्रैर्वा चंडिकायै शुभं हविः ॥३५॥ भूयो नामपदैर्देवीं पूजयेत्सुसमाहितः ॥
प्रयतः प्रांजलिः प्रह्वः प्रणम्यारोप्य चात्मनि ॥३६॥ सुचिरं भावयेदीशां चं-
डिकां तन्मयो भवेत्। एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीं ॥३७॥ भुक्त्वा भोगा-
न्यथाकामं देवीसायुज्यमाप्नुयात्। यो न पूजयते नित्यं चंडिकां भक्तवत्सलां
॥३८॥ भस्मीकृत्वास्य पुण्यानि निर्दहेत्परमेश्वरी। तस्मात्पूजय भूपाल सर्वलो- ४८
कमहेश्वरीं ॥३९॥ यथोक्तेन विधानेन चंडिकां सुखमाप्स्यसि ॥४०॥ इति श्री

त्सरस्वती प्रोक्ता शुंभासुरनिबर्हणी ॥१४॥ दधौ चाष्टभुजा बाणमुशले
शूलचक्रभृत्। शंखं घंटां लांगलं च कार्मुकं वसुधाधिप ॥१५॥ एषा संपूजि-
ता भक्त्या सर्वज्ञत्वं प्रयच्छति। निशुंभमथिनी देवी शुंभासुरनिबर्हणी ॥
१६॥ इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव। उपासनं जगन्मातुः पृथ-
कायानिशामय ॥१७॥ महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती। दक्षि-
णोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयं ॥१८॥ विरंचिः स्वरया मध्ये रुद्रो गौर्या
च दक्षिणे। वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयं ॥१९॥ अष्टादशभुजा
मध्ये वामे चास्या दशानना। दक्षिणेष्टभुजा लक्ष्मीर्महतीति समर्चयेत ॥२०

सर्वादिदलनः पूज्याः पितॄणां गात्रसेरवाः। अष्टादशभुजा चैव तथा दशस
ज्या नराधिपा। द्वात्रिंशता बाहुभुजा द्विशिरोच्चरघोरस्वरूपा। कालसूत्रच
संरज्योत्स्ना वारिहवज्रांतसे ॥२२॥ षष्ठाबाहुभुजा सज्या शंखासुरनिबह
णी। नवास्याः शाकवः पूज्या स्वरासङ्ग विनादको ॥२३॥ नमो देव्या इति
स्तोत्रे महालक्ष्मी समर्पिते। अवतारत्रयार्चायां स्तोत्रमंत्रास्तदाश्रयाः
॥२४॥ अष्टादशभुजा चैषा यस्या महिषमर्दिनी। महालक्ष्मीर्महाकाली
सैव प्रोक्ता सरस्वती ॥२५॥ ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी। महि ५७
षांतकरी येन पूजिता स जगत्प्रभुः ॥२६॥ पूजयेज्जगतां धात्रीं चंडिकां भक्त

(११५)

मूर्ति रहस्यं मंत्र

10-पृ० तन्त्र

पा० सं० 4274

॥

क्र०-९५